## आदर्शप्रश्नपत्रम्

**संस्कृतम् (३०९) Sanskrit 309**

**परीक्षासमयावधिः (Time) होरात्रयम् (3 Hrs)** **पूर्णाङ्काः (Full Marks) - 100**

---

**निर्देशाः -**

1) अस्मिन् प्रश्नपत्रे [A] भागे 20, [B] भागे 7, [C] भागे 5, [D] 5, [E] भागे 4 इति आहत्य 41 प्रश्नाः सन्ति।
2) समे प्रश्ना अनिवार्याः। तत्र वैकल्पिकभागेषु एकः एव समाधेयः।
3) प्रत्येकं प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (अङ्काःxप्रश्नाः=पूर्णाङ्काः) इति अङ्काः दीयन्ते।
4) A भागे प्र.सं. 1 तः 15 पर्यन्तं – बहुविकल्पप्रकारस्य प्रश्नाः (MCQs) येषु प्रत्येकं एकः अंकः भवति। एतेषु प्रत्येकस्मिन् प्रश्ने दत्तचतुर्णां विकल्पानां मध्ये सर्वाधिकं उपयुक्तं विकल्पं चित्वा लिखन्तु। एतेषु केषुचित् प्रश्नेषु आन्तरिकः विकल्पः प्रदत्तः अस्ति। एतादृशेषु प्रश्नेषु दत्तविकल्पेषु एकस्य एव प्रयासः करणीयः।
5) B भागे प्र.सं. 21 तः 27 पर्यन्तम् – वस्तुनिष्ठप्रश्नाः। प्रत्येकं प्रश्नः अंकद्वयात्मकः अस्ति। ते यथानिर्देशं समाधेयाः।
6) C भागे प्र.सं. 28 तः 32 पर्यन्तम् अतिलघूत्तरियाः प्रश्नाः प्रत्येकम् अंकद्वयात्मकाः सन्ति। ते यथानिर्देशं समाधेयाः।
7) D भागे प्र.सं. 33 तः 37 पर्यन्तम् अनतिदीर्घोत्तरीयाः प्रश्नाः प्रत्येकम् चतुरंकात्मकाः सन्ति। ते यथानिर्देशं 50 तः 80 शब्दानां परिधिमध्ये समाधेयाः।
8) E भागे प्र.सं. 38 तः 41 पर्यन्तम् दीर्घोत्तरीयाः प्रश्नाः प्रत्येकम् पञ्च अंकात्मकाः सन्ति। ते यथानिर्देशं 80 तः 100 शब्दानां परिधिमध्ये समाधेयाः।
9) समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेख्यानि।
10) स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गूढसंख्या नूंन लेख्या।
11) उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति।
12) समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि।
13) निरीक्ष्यताम् यत् प्रश्नपत्रस्य पुटसंख्या प्रश्नानां च संख्या प्रथमपुटस्य प्रारम्भे प्रदत्तसंख्या समाना न वा। प्रश्नक्रमः सम्यग् न वा।
14) अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपुटे नूनं लेख्यः।

[A] पंचदशप्रश्नानानां युक्तं विकल्पं चिनुत। 1 x 15 = 15

1. कस्य राज्ये कश्चन जनः पिशुनः तस्करः नासीत्। 1

(क) भोजराजस्य (ख) वकासुरस्य (ग) पुत्तलिकाया (घ) विक्रमस्य।

2. 'किंस्वित् सूर्यसमं ज्योतिः' इत्यादिमन्त्रः कस्मिन् वेदे विद्यते। 1

(क) ऋग्वेदे (ख) सामवेदे (ग) यजुर्वेदे (घ) अथर्ववेदे।

3. हिमालये प्रमुखः वृक्षः कः विद्यते। 1

(क) देवदारुवृक्षः (ख) चन्दनवृक्षः (ग) जम्बीरवृक्षः (घ) वटवृक्षः।

4. 'कष्टं न्यासस्य रक्षणम्' इति नाट्यांशस्य रचयिता कः। 1

(क) कालिदासः (ख) विशाखदत्तः (ग) भवभूतिः (घ) शूद्रकः।

5. 'हृदयपरिवर्तनम्' इति नाट्यांशे कति ब्राह्मणवेशधारिणः यक्षाः आसन्। 1

(क) चत्वारः (ख) पञ्च (ग) षट् (घ) सप्त।

6. 'परिरक्ष सम्यग् गरुडनीडानि' इति कस्य वचनम्। 1

(क) भोजराजस्य (ख) शक्रस्य (ग) मातलेः (घ) दैत्यस्य।

7. बुद्धिं तु ______ विद्धि मनः प्रग्रहमेव च। 1

(क) रथिनम् (ख) सारथिम् (ग) हरिणम् (घ) इन्द्रियम्।

8. प्रसिद्धे ऋणत्रये किं नास्ति। 1

(क) देवऋणम् (ख) पितृऋणम् (ग) मातृऋणम् (घ) ऋषिऋणम्।

9. 'अतिथीनां सेवा अस्माकं धर्मः' इति कस्य वचनम्। 1

(क) यक्षस्य (ख) मैत्रबलस्य (ग) मन्त्रिणः (घ) विक्रमस्य।

10. 'चपलः सरक्तगौरो मज्जासारश्च माहेयः' इति कस्य स्वरूपम्। 1

(क) सूर्यस्य (ख) कुजस्य (ग) वुधस्य (घ) चन्द्रस्य।

11. कः कं न द्विक्षन्। 1

(क) भ्राता मातरम् (ख) स्वसा भ्रातरम् (ग) भ्राता भ्रातरम् (घ) भ्राता स्वसारम्।

12. अस्वेदवेपथुः इति पदस्यार्थः कः। 1

(क) घर्म कम्पनं च नास्ति यस्य सः (ख) घर्म नास्ति कम्पनं च अस्ति यस्य सः

(ग) घर्म विद्यते कम्पनं नास्ति यस्य सः (घ) घर्म च कम्पनं च अस्ति यस्य सः।

13. दीपश्चापि न मर्षयेदभिमुखं स्याल्लक्षसुतं यदि - इत्यत्र मर्षयेत् इति पदस्यार्थः कः। 1

(क) अवगच्छेत् (ख) सहेत (ग) कल्पेत (घ) निवारयेत्।

14. सताम् इति कीदृशं रूपम्। 1

(क) द्वितीयैकवचनान्तम् (ख) षष्ठ्यकेवचनान्तम् (ग) षष्ठीबहुवचनान्तम् (घ) सप्तमीबहुवचनान्तम्।

15. किम्-शब्दस्य पुंलिङ्गे पञ्चम्येकवचने किं रूपम्। 1

(क) कस्मिन् (ख) कस्य (ग) केन (घ) कस्मात्।

16. उचितविकल्पान् मेलयत 4 (1x4)

| क स्तम्भः | | ख स्तम्भः |
|---|---|---|
| I. सुरेन्द्रवाहिनी | क | वृद्ध+ईयसुन् |
| II. वर्षीयान् | ख | द्वन्द्वः |
| III. धर्मार्थकाममोक्षाणाम् | ग | बहुव्रीहिः |
| IV. विज्ञातचरितः | घ | सुरेन्द्रस्य वाहिनी |

17. अधोलिखितेषु सत्यम् असत्यं वा इति चिनुत 4 (1x4)

I. बकासुरः पलाशनामनगरे वसति स्म।

II. जम्बुफलम् वर्षर्तौ भुज्यत।

III. कल्पना हरियाणाराज्यस्य रोहतकनगरे जन्म लब्धवती।

IV. चारुदत्तः मृच्छकटिकनाटस्य नायकः अस्ति।

18. सन्धिं सन्धिविच्छेदं वा कुरुत 4(1*4)

I. आत्म + उत्सर्गः = ..............

II. यथा + आज्ञापयति = ..................

III. ....... + आम्रफलम् = पतत्याम्रफलम्

IV. सत्येन + ........... = सत्येनैनम्

19. अधोरेखांकितं पदम् अनुसृत्य प्रश्ननिर्माणं कुरुत 4 (1*4)

I. बकासुरः प्रतिदिनं जनान् भक्षयति।

II. लब्धदत्तं पुनः आह्वयतु।

III. वासुदेवस्य पुत्रः श्रीकृष्णः ।

IV. सानूनि गन्धः सुरभीकरोतु।

20. अधोलिखितेषु प्रकृतिप्रत्ययविभाजनं कुरुत। 5 (1*5)

I. ........ +........ + ........ = विहर्तुम्

II. आङ् + रुह् + क्त = .............

III. गम् + अनीयर् = ...................

IV. .......... + ........... = लिखितम्

V. आ + गम् + ल्यप् = ...............

21. उदाहरणानुसारम् अधोलिखितानां शब्दरूपाणां विभक्तिं वचनं च चिनुत 5(1*5)

| | शब्दः | विभक्तिः वचनम् | रूपम् |
|---|---|---|---|
| उदा. | लता | चतुर्थी एकवचनम् | लतायै |
| 1. | मनस् | पञ्चमी बहुवचनम् | .......... |
| 2. | भवत् | चतुर्थी द्विवचनम् | ........... |
| 3. | धनवत् | षष्ठी एकवचनम् | ............. |
| 4. | गृहम् | सप्तमी बहुवचनम् | ............. |
| 5. | राजन् | प्रथमा एकवचनम् | .............. |

भाग [B]

यथानिर्देशम् उत्तराणि लिखत। 2x2= 4

22.'काले फलति सौभाग्यम्' इति नाटकस्य रचयिता कः। इयं कथा कस्माद् ग्रन्थाद् उद्धृता। 2

अथवा

'कष्टं न्यासस्य रक्षणम्' इति नाटकस्य रचयिता कः। इयं कथा कस्माद् ग्रन्थाद् उद्धृता।

23. 'पतन्ति परपीडकाः' इति नाटके प्रतीहार्या अभिधानं किम्। मुष्टिकः केन निहतः। 2

## भाग [C]

पञ्च अनतिदीर्घोत्तरैः समाधत्त। 4x5=20

24. 'काले फलति सौभाग्यम्' इति नाटकम् आश्रित्य लब्धदत्तस्य चरितं वर्णयत।

अथवा

'कष्टं न्यासस्य रक्षणम्' इति नाटकम् आश्रित्य चारुदत्तस्य चरितं वर्णयत।

25. 'पतन्ति परपीडकाः' इति नाटकम् आश्रित्य श्रीकृष्णस्य लीला वर्णयत।

26. 'मानो हि महतां धनम्' इति नाटकस्य सारं लिखत।

27. 'कल्पनाकीर्तिः विजयते' इति गद्यांशम् आश्रित्य कल्पनाचवलाया अन्तरिक्षगमनं समासेन लिखत।

28. पर्यावरणस्य भूमिमण्डलं जलमण्डलं च निर्वर्ण्य तयोः दूषणनिरोधाय संरक्षणाय च उपायद्वयं वर्णयत।

## भाग [D]

चत्वारः दीर्घोत्तरैः समाधेयाः। 5x4=20

29. अधोलिखितविषयम् अधिकृत्य मञ्जूषासाहाय्येन दशसु वाक्येषु एकम् अनुच्छेदं लिखत।
'अस्माकं देशः भारतम्'।

मञ्जूषा - जन्मभूमिः, उत्तरे हिमालयः, तिसृषु दिक्षु सागराः, गङ्गायमुनागोदावरीसरस्वतीनर्मदासिन्धुकावेर्यादयः प्रसिद्धा नद्यः, मध्ये विन्ध्याचलः, महती संस्कृतिः, महान्तः कालिदासाद्याः कवयः, महान्तः ग्रन्थाः, रामायणादयः धर्मग्रन्थाः, विपुलं साहित्यम्, देशभक्ताः। सूक्तिः - जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।

अथवा

'संस्कृभाषायाः महत्त्वम्' – मञ्जूषा- प्राचीनभाषा, वैज्ञानिकी, वेदज्ञानम्, भगवद्गीता, संस्कृतिः, महान्तः कालिदासाद्याः कवयः, महान्तः ग्रन्थाः, रामायणादयः धर्मग्रन्थाः, विपुलं साहित्यम्। सूक्तिः संस्कृतिः संस्कृताश्रिता।

30. मात्रा सह पुत्री बालिकानाम् अनादरः इति विषयम् आश्रित्य वार्तालापं करोति। तयोः संवादं दशसु वाक्येषु वर्णयत। अथवा ग्रीष्मावकाशे पर्वतीयप्रदेशगमनम् इति विषयं समाश्रित्य भ्रातुः भगिन्याश्च मध्ये संवादं दशसु वाक्येषु वर्णयत।

31. भवान् रामः स्वमित्रं हरिं प्रति द्वादशकक्षायां संस्कृतपठनाय तस्य उत्साहं वर्धयितुं पत्रं लिखतु।

32. 'जगन्नाथरथयात्रा' अथवा 'ग्रामे गणेशोत्सवः' इति विषयं समाश्रित्य परियोजनाम् एकां लिखत।

वैकल्पिकभागः क

अधोलिखितेषु युक्तियुक्तं विकल्पं चिनुत।

33. थाईदेशविलासम् अस्ति- 1

क) नाटकम् ख) यात्राकाव्यम् ग) प्रकरणम् घ) शतककाव्यम्

34. ऋग्वेदानुसारम् अयुतम् इति संख्या भवति- 1

क) १०० ख) १००० ग) १०००० घ) १०००००

35. आयुर्वेदग्रन्थेषु केषां समावेशः नास्ति- 1

क) संहितानाम् ख) व्याख्याग्रन्थानाम् ग) विशिष्टविषयाधृतग्रन्थानाम् घ) नाटकानाम्

36. मेघभेदेषु अयम् नास्ति- 1

क) पुष्करः ख) विन्ध्याचलः ग) आवर्तः घ) संवर्तः

37. भार्गवराघवीयम् इति कस्य कृतिः- 1

क) रामभद्राचार्यः ख) कुसुमाग्रजः ग) वा. शि. आप्टे

38. अधोलिखितेषु युग्मानां मेलनं कुरुत- 4

| | महाकाव्यम् | लेखकः |
|---|---|---|
| I. | उत्तरसीताचरितम् | क जी. बी. पल्सुले |
| II. | जानकीजीवनम् | ख सत्यव्रतशास्त्री |
| III. | इन्दिरागान्धिचरितम् | ग राजेन्द्रमिश्रः |
| IV. | जवाहरज्योतिमहाकाव्यम् | घ रेवाप्रसाद द्विवेदी |

प्रश्नत्रयं समाधेयम् 2x3=6

39. मुक्तककाव्यं किं भवति? द्वयोः मुक्तककाव्ययोः नामनी लिखत। 2

अथवा

यात्राकाव्यस्य सोदाहरणं विवरणं लिखत।

40. संस्कृतपत्रपत्रिकाः इति विषये सोदाहरण विवरणं लिखत। 2

41. सुश्रुतसंहितायाः संक्षिप्तं परिचयं लिखत। 2

अथवा

दृश्यश्रव्यमाध्यमेषु संस्कृतकार्यक्रमाणां संक्षितं विवरणं लिखत

वैकल्पिकभागः ख

अधोलिखितेषु युक्तियुक्तं विकल्पं चिनुत।

33. संस्कृतभाषायाः प्रयोजनानि सन्ति - 1

क) विविधानि ख) अद्भुतानि ग) असमीचीनानि घ) बोद्धव्यानि

34. जर्मनीदेशस्य श्रव्यप्रसारणमाध्यमकेन्द्रात् संस्कृतभाषायां वार्ताप्रसारणं भवति- 1

क) दैनिकम् ख) साप्ताहिकम् ग) मासिकम् घ) त्रैमासिकम्

35. दूरदर्शने संस्कृतवार्तानां दैनिकं प्रसारणं कस्मिन् वर्षे आरब्धम्- 1

क) 1990 ख) 2010 ग) 2005 घ) 2002

36. लौकिकसंस्कृतम् अधोलिखितेषु कस्य ग्रन्थस्य भाषा नास्ति- 1

क) पञ्चतन्त्रम् ख) ऋग्वेदसंहिता ग) अर्थशास्त्रम् घ)

37. रामायणम्अधोलिखितेषु किं संस्कृतचलचित्रस्य नाम-

क) आदिशंकराचार्यः ख) सूर्यवंशम ग) नायक घ) दृश्यम् 1

38. अधोलिखितेषु युग्मानां मेलनं कुरुत- 4

| महाकाव्यम् | | लेखकः |
|---|---|---|
| I. | अष्टाङ्गहृदयम् | क लौकिककोशः |
| II. | शुल्वसूत्रम् | ख वैदिककोशग्रन्थः |
| III. | निघण्टुः | ग गणितविद्या |
| IV. | अमरकोशः | घ चिकित्साग्रन्थः |

प्रश्नत्रयं समाधेयम् 2x3=6

39. द्वयोः व्यावसायिकक्षेत्रयोः नामनी लिखत यत्र संस्कृतभाषायाः ज्ञानस्य उपयोगः भवति? 2

अथवा

व्यंग्यचित्रं किं भवति? संक्षेपेण लिखत।

40. दूरदर्शनस्य (D.D. इत्यस्य) द्वयोः प्रणाल्योः नामनी लिखत। 2

41. वार्त्ताभिकरणम् (News Agency) किं भवति इति विषये संक्षेपेण लिखत। 2

अथवा

संस्कृतवार्त्ताप्रसारणस्य प्रक्रियायाः चरणद्वयस्य नामनी लिखत।

संस्कृतम् (३०९) Sanskrit 309 MS

परीक्षासमयावधिः (Time) होरात्रयम् (3 Hrs) पूर्णाङ्काः (Full Marks) - 100

[A] प्रश्नानां युक्तं विकल्पं चिनुत। 1 x 15 = 15

1) (घ) विक्रमस्य। 1

2) (ग) यजुर्वेदे 1

3) (क) देवदारुवृक्षः 1

4) (घ) शूद्रकः। 1

5) (ख) पञ्च 1

6) (ख) शक्रस्य 1

7) (ख) सारथिम् 1

8) (ग) मातृऋणम् 1

9) (ख) मैत्रबलस्य 1

10) (ख) कुजस्य 1

11) (ग) भ्राता भ्रातरम् 1

12) (क) घर्म कम्पनं च नास्ति यस्य सः 1

13) (ख) सहेत 1

14) (ग) षष्ठीबहुवचनान्तम् 1

15) (घ) कस्मात्। 1

16. उचितविकल्पान् मेलयत 4 (1x4)

| क स्तम्भः | ख स्तम्भः |
|---|---|

I. सुरेन्द्रवाहिनी सुरेन्द्रस्य वाहिनी

II. वर्षीयान् वृद्ध+ईयसुन्

III. धर्मार्थकाममोक्षाणाम् द्वन्द्वः

IV. विज्ञातचरितः बहुव्रीहिः

17. अधोलिखितेषु सत्यम् असत्यं वा इति चिनुत 4 (1x4)

I. सत्यं

II. सत्यं

III. असत्यं

IV. सत्यं

18. सन्धिं सन्धिविच्छेदं वा कुरुत
4(1*4)

I. आत्मोत्सर्गः

II. यथज्ञापयति

III. पतति

IV. एनम्

19. अधोरेखांकितं पदम् अनुसृत्य प्रश्ननिर्माणं कुरुत 4 (1*4)

I. बकासुरः प्रतिदिनं कान् भक्षयति।

II. कं पुनः आह्वयतु?

III. वासुदेवस्य पुत्रः श्रीकृष्णः ?

IV. सानूनि कः सुरभीकरोतु?

20. अधोलिखितेषु प्रकृतिप्रत्ययविभाजनं कुरुत। 4(1*4)

I. वि + हृ + तुमुन्

II. आरूढः

III. गमनीयः/गमनीयम्

IV. लिख् + क्त

V. आगत्य

21. उदाहरणानुसारम् अधोलिखितानां शब्दरूपाणां विभक्तिं वचनं च चिनुत 5(1*5)

| | शब्दः | विभक्तिः वचनम् | रूपम् |
|---|---|---|---|
| उदा. | लता | चतुर्थी एकवचनम् | लतायै |
| 1. | मनस् | पञ्चमी बहुवचनम् | मनसः |
| 2. | भवत् | चतुर्थी द्विवचनम् | भवद्भ्याम् |
| 3. | धनवत् | षष्ठी एकवचनम् | धनवतः |
| 4. | गृहम् | सप्तमी बहुवचनम् | गृहेषु |

5. राजन् प्रथमा एकवचनम् राजा

22. उचितेन धातुरूपेण वाक्यपूर्तिं कुरुत 5 (1*5)

1 कथयति

2 तिष्ठति

3 शक्नोति

4 भक्षयिष्यामः

5 त्यजन्तु

[B] पञ्चानां प्रश्नानां यथानिर्देशम् उत्तराणि लिखत।

23. 'काले फलति सौभाग्यम्' इति नाटकस्य रचयिता श्री-नी-ना-मध्यस्थः। इयं कथा कथासरित्सागरग्रन्थाद् उद्धृता। 2

अथवा

'कष्टं न्यासस्य रक्षणम्' इति नाटकस्य रचयिता कः। इयं कथा कस्माद् ग्रन्थाद् उद्धृता।

24. 'पतन्ति परपीडकाः' इति नाटके प्रतीहार्या मधुरिका इति अभिधानम्। मुष्टिकः बलरामेण निहतः। 2

25. गोमायुः पूर्वस्मिन् जन्मनि पौरिकनामकः क्रूरःराजा आसीत्। स तदा श्रीमत्यां पुरिकानामिकायां नगर्यां निवसति स्म। 2

26. २००३ र्षे कोलम्बियाशटलयानेन यात्र आरब्धा। तदा इदं विविधैः यन्त्रैः सुसज्जितं सप्तयात्र्युपेतं ध्वनिवेगादपि वेगेन उड्डीयमानम् आसीत्। अनेन कर्कटरोगम् अधिकृत्य महत्त्पूर्णधारणानां संग्रहः विहितः। 2

27. जैविकरन्धनवायोः प्रयोगः करणीयः।पेट्रोलादितैलरहितानां द्विचक्रिकादीनां सामान्यकार्येषु उपयोगः कार्यः। 2

[C] पञ्च अनतिदीर्घोत्तरैः समाधत्त। 4x5=20

28. 'काले फलति सौभाग्यम्' इति नाटकम् आश्रित्य लब्धदत्तस्य चरितम्-

क) विनम्रता

ख) धैर्यम्

ग) सत्यवादिता इत्यादीन् गुणान् आश्रित्य अष्टौ वाक्यानि लेखनीयानि।

अथवा

'कष्टं न्यासस्य रक्षणम्' इति नाटकम् आश्रित्य चारुदत्तस्य चरितंम्-

क) विनम्रता

ख) दानशीलता

ग) सत्यनिष्ठा इत्यादीन् गुणान् आश्रित्य अष्टौ वाक्यानि लेखनीयानि।

29. 'पतन्ति परपीडकाः' इति नाटकम् आश्रित्य श्रीकृष्णस्य लीलाः-

क) चाणूरमर्दनम् ख) कु ब्जायाः रोगहरणम् ग) गजमर्दनम् घ) कंसहननम् इत्यादिलीला आश्रित्य अष्टौ अष्टौ वाक्यानि लेखनीयानि।

30. 'मानो हि महतां धनम्' इति नाटकस्य सारः- क) पौरिकस्य गोमायुजन्म पूर्वजन्मस्मरणम्। ख) व्याघ्रस्य मन्त्रित्वस्वीकारः। ग) व्याघ्रसहचराणां दौष्ट्यम्। घ) व्याघ्रजनन्याः उपदेशः। ङ) शृगालस्य व्याघ्रं प्रत्युपदेशः।

31. 'कल्पनाकीर्तिः विजयते' इति गद्यांशम् आश्रित्य कल्पनाचलाया अन्तरिक्षगमनम् - क) भारतर्षे जन्म सम्प्राप्ता कल्पनाचावला १९८८ ख्रिष्टाब्दे नासाकेन्द्रे कार्यं प्रारब्धवती। ख) १९९७ ख्रिष्टाब्दे पुनः अन्तरिक्षयात्रा। ग) २००३ ख्रिष्टाब्दे पुनः अन्तरिक्षगमनम्। घ) अन्तरिक्षे लीना।

32.    पर्यारणस्य भूमिमण्डलम्- क) भूमिमण्डलस्य वैशिष्ट्यम्। ख) दूषणनिरोधोपायः। ग) जलमण्डलस्य वैशिष्ट्यम्। घ) दूषणनिरोधोपायः।

[D] चत्वारः दीर्घोत्तरैः समाधेयाः।    4x5=20

38. अस्माकं जन्मभूमिः भारतवर्षम् अस्माकंगौरवम्। अस्य उत्तरे नगाधिराजः हिमालयःतिसृषु दिक्षु सागराः वर्तन्ते। हिमालयादिपर्वतेभ्यः अस्मिन् गङ्गायमुना-गोदावरीसरस्वतीनर्मदासिन्धुकावेर्यादयः प्रसिद्धा नद्यः प्रवाहिताः। अस्य मध्ये विन्ध्याचलः वर्तते। भारतवर्षस्य महती संस्कृतिः । महान्तः कालिदासाद्याः कवयः अस्मिन् भूभागे जन्म सम्प्राप्ताः। अस्य संस्कृतिः संस्कृतं चेति प्रतिष्ठाद्वयम्। अत्र रामायणमहाभारताद्यैतिहासिकग्रन्थाः, रघुवंशादीनि महाकाव्यानि संस्कृतभाषायां विरचितानि। अतः स्मर्यते सूक्तिः – जननी जन्मभूमिश्च स्वर्गादपि गरीयसी इत्यादिप्रकारेण

अथवा

संस्कृत भाषा अस्माकं देशस्य प्राचीनतमा भाषा अस्ति। प्राचीनकाले सर्वे एव भारतीयाः संस्कृतभाषाया एव व्यवहारं कुर्वन्ति स्म। कालान्तरे विविधाः प्रान्तीयाः भाषाः प्रचलिताः अभवन्, किन्तु संस्कृतस्य महत्त्वम् अद्यापि अक्षुण्णं वर्तते। सर्वे प्राचीनग्रन्थाः चत्वारो वेदाश्च संस्कृतभाषायामेव सन्ति। संस्कृतभाषा भारतराष्ट्रस्य एकतायाः आधारः अस्ति। संस्कृतभाषायाः यत्स्वरूपम् अद्य प्राप्यते, तदेव अद्यतः सहस्रवर्षपूर्वम् अपि आसीत्। संस्कृतभाषायाः स्वरूपं पूर्णरूपेण वैज्ञानिक अस्ति । अस्य व्याकरणं पूर्णतः तर्कसम्मतं सुनिश्चितं च अस्ति ।। आचार्य-दण्डिना सम्यगेवोक्तम्   भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती।"   अधुनाऽपि सङ्गणकस्य कृते संस्कृतभाषा अति उपयुक्ता अस्ति। संस्कृतभाषैव भारतस्य प्राणभूता भाषा अस्ति । राष्ट्रस्य ऐक्यं च साधयति । भारतीयगौरवस्य रक्षणाय एतस्याः प्रसारः सर्वैरेव कर्त्तव्यः । अतएव उच्यते-'संस्कृतिः संस्कृताश्रिता।

वैकल्पिकभागः क

अधोलिखितेषु युक्तियुक्तं विकल्पं चिनुत।

33. क) यात्राकाव्यम् 1

34. ग) १०००० 1

35. घ) नाटकानाम् 1

36. ख) विन्ध्याचलः 1

37. क) रामभद्राचार्यः 1

38. अधोलिखितेषु युग्मानां मेलनं कुरुत- 4

| महाकाव्यम् | लेखकः |
|---|---|
| I. उत्तरसीताचरितम् | घ रेवाप्रसाद द्विवेदी |
| II. जानकीजीवनम् | ग राजेन्द्रमिश्रः |
| III. इन्दिरागान्धिचरितम् | ग ख सत्यव्रतशास्त्री |
| IV. जवाहरज्योतिमहाकाव्यम् | क जी. बी. पल्सुले |

प्रश्नत्रयं समाधेयम् 2x3=6

39. छात्रा स्वयं करिष्यन्ति 2

अथवा

छात्रा स्वयं करिष्यन्ति

40. छात्रा स्वयं करिष्यन्ति 2

41. छात्रा स्वयं करिष्यन्ति 2

अथवा

छात्रा स्वयं करिष्यन्ति

वैकल्पिकभागः ख

अधोलिखितेषु युक्तियुक्तं विकल्पं चिनुत।

33. क) विविधानि 1

34. ख) साप्ताहिकम् 1

35. घ) 2002 1

36. ख) ऋग्वेदसंहिता 1

37. क) आदिशंकराचार्यः 1

38. अधोलिखितेषु युग्मानां मेलनं कुरुत-

4

| महाकाव्यम् | | लेखकः |
|---|---|---|
| I. | अष्टाङ्गहृदयम् | घ चिकित्साग्रन्थः |
| II. | शुल्वसूत्रम् | ग गणितविद्या |
| III. | निघण्टुः | ख वैदिककोशग्रन्थः |
| IV. | अमरकोशः | क लौकिककोशः |

प्रश्नत्रयं समाधेयम् 2x3=6

39. छात्रा स्वयं करिष्यन्ति 2

अथवा

छात्रा स्वयं करिष्यन्ति ।

40. दू छात्रा स्वयं करिष्यन्ति । 2

41. छात्रा स्वयं करिष्यन्ति । 2

अथवा

छात्रा स्वयं करिष्यन्ति ।